सान्निषेध इत्ति पैठैः॥तथा च वायुपुराणे॥संत्ति वेदविरोधेन केचिद्विज्ञानमानिनः॥अयस्त्र यतयो नाम वधयंतिय
थारज इत्ति॥वाराहेपि॥वैश्वदेवे नियुंजीत ब्रह्मचारी शुचिं विना॥भिक्षुकान्देवतार्थे तु पूजयेदिति॥विंयथेति॥
च्छागलेयोपि॥गंधमाल्यैः फलैश्चैव भोजनैः क्षीरसंस्कृतैः॥संपूजयेद्यतिं श्राद्धे पितॄणां तुष्टिकारकं॥ब्रह्मचारी
यतिश्चैव पूजनीयो हि नित्यशः॥तल्लंघनं यस्यात्तस्य षड्भागमाप्नुयादिति॥मार्कंडेयोपि॥भिक्षार्थमागतान्वापि का
ले संयमिनो यतीन्॥भोजयप्रणिपाताद्यैः प्रसाद्यो यत्तमानस इत्ति॥ कन्यतरावपि॥पूजयेच्छ्राद्धकाले
पि यतिं सब्रह्मचारिणं॥विप्रानुद्धरते पापात्पितृमातृगणानपि॥भुंजते यत्र कुत्रापि यतयो ब्रह्मचारिणं॥
तृप्यंति पितरो देवाः सोपि याति परां गतिं॥अलाभे ध्यानभिक्षुणां पूजयेद्ब्रह्मचारिणं॥तदलाभे सूदासी
नं गृहस्थमपि भोजयेदिति॥विश्वामित्रोपि॥यतिर्वा ब्रह्मचारी वा भुंजीयाच्चेद्द्विजन्मना॥श्राद्धे यत्र भ
वेत्साक्षी महालयसमं हितादिति॥ये के यतीनैत्तिकासायनसूत्रेपि॥वृद्धवसिष्ठोपि॥चत्वार आश्रमाः ति
सन्यासी देवश्राद्धेन सर्वदा॥चतुराश्रमबाह्येभ्यः श्राद्धं नैव प्रदापयेदिति॥देवं च श्राद्धं चेति॥देवश्राद्धं॥ते
नेत्यर्थः॥मार्कंडेयपुराणेपि॥ब्राह्मणानां सहस्रेभ्यो योगी त्वग्राशनो यदि॥यजमानं च भोक्तृंश्च नौरिवां
भसि तारयेत्॥नैचैतत्त्रिदंडीविषयमेवेति मंतव्यं॥परमहंसस्यापि श्राद्धे पूज्यत्वेन श्रवणात्॥तथा च

श्रीभागवते ॥ सप्तमस्कंधे ॥ कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठा द्विजापरे ॥ स्वाध्यायेन्ये प्रवचने येकेचिज्ञानयोगयोः ॥ ज्ञाननि
ष्ठायदेयानि कव्यान्यानंत्युमिच्छता ॥ दैवे च तदभावे स्यादितरेभ्यो यथार्हतः ॥ इति कुटीचकाबहूदकश्च हंसः परमहंसकः ॥
तु एवंचर्विधायत्तयः श्राद्धभोज्याः प्रयत्नतः इति विष्णुस्मृतौ ॥ हेमाद्रौ नारदीयेपि ॥ योवैयतीननाहत्स भोजयेदितरांद्विजान् ॥
न विजानैवसतोग्रामेकव्यंतद्याति राक्षसानिति ॥ दक्षस्मृतावपि ॥ विनामांसेन मधुना विनादक्षिणयात्रिषा ॥ परिपूर्णंभि
विश्राद्धं येतिषु श्राद्धभोजिषु ॥ तस्माद्यतयः श्राद्धभोज्या इति सिद्धं गारुडे ॥ अथ श्राद्धविधिं वक्ष्य इत्युपक्रम्याग्र्याः सर्वेषु
वेदेषिद्ग्रंथेन श्राद्धाये ब्राह्मणास्तु कीर्त्तितं ॥ रोगिहीनातिरिक्तांगः काणः पौनर्भवस्तथा ॥ अवकीर्णीदयोयेन्ये च ये च वाचा
रवर्जिताः ॥ अवैष्णवाश्चये विप्रा न श्राद्धार्हाः केशवार्चने सर्वेस्मृतिनिषेधाद्धेमवब्राह्मणाः श्राद्धमूलाइतिगम्यते ॥ वैष्ण
वत्वमपिदीक्षामंत्रादिमत्वेनैव ॥ वैखानससात्वागमोक्तदीक्षांप्राप्ताः हि वैष्णवा इत्यादिस्मृतेर्यथाहवनीयादिवत् ॥ भा
वा रतेपातुन्नासनिके ॥ यततयो मोक्षधर्मज्ञानयोगिनश्चरितव्रताः ॥ पंचरात्रविदो मुख्या येच भागवताः परे इतिपां
क्तेयप्रस्तावे पंचरात्रोक्तदीक्षावंतो वैष्णवाः ॥ श्राद्धार्हतिमाहत्सूक्तं ॥ यदत्र ॥ ह्राचकेशवयोरंकान्स्थूलचक्रा
दिकान्द्विजः ॥ न धारयेत्तमतिमान्वैदिके वर्त्मनि स्थितः ॥ नादृत्रांवर्जयेच्छ्रौते स्मार्त्ते च कर्मणि इत्यादि आश्वला धा
यनादिवचनं ॥ तत्तु रथाङ्गसमर्थत्वेन वा तद्धारणपरं ॥ इतरथा गारुडं निर्विषयं स्यात् ॥ अत एवैकादशस्कंधे श्री
धराचार्यः ॥ रथाङ्गानं च नृसं च रथाङ्गं खादिधारणं ॥ नाचरेन्मतिमान्विप्र विष्णुप्रीत्यर्थमाचरेदित्याहुः ॥ समर्थि

तंचैतत्त्रयेत्तीस्तवकरद्रूपरम्पते॥चंद्रिकायांनग्नातपः॥अग्निष्टोमादिभिर्यज्ञैर्यैर्यजंस्वल्पदक्षिणैः॥तेषामन्नंन
भोक्तव्यंमपांक्तेयाश्चकीर्तिताइति॥एतच्च[illegible]सैमितिद्वयं॥अव्रतीकितवःस्तेनःप्राणिविक्रयकोपिवा॥
पश्चाच्चेत्स्नातवान्सोपिसोपिकेतनमर्हति[illegible]रतीति॥श्राद्धदीपकलिकायागमः॥अपत्नीकश्चवर्जःस्यात्त
पत्नीकश्चानग्निकः॥प्रतिमाविक्रयी[illegible]निपतितस्तथा॥नावनार्थपरास्थीनिधर्मार्थप्रयातिचः॥
मातापितृभ्यांविनावासोपतितःपरिकीर्तितः॥नैतेश्राद्धेनियोक्तव्याअनियुक्ताःश्राद्धघातकाःइति॥आत्तकर्ण्यः॥
यत्रमातुलजोद्वाहीयत्रवारजसोपतिः॥वैन[illegible]पिलनाथेहुतंयच्चनिरामिषं॥पितापुत्रोभ्रातरौद्वौनिरग्नि
गुर्विणीपतिं॥शैवंपाशुपतंचैवश्राद्धेषुपरिवर्जयेदिति॥मातुलेजोद्वाहीगांधर्वादिविवाहेन॥समर्थेनंचैतत्
तृतीये॥हेमाद्रौमात्स्ये॥त्रिशंकून्बर्बरानाध्रान्चीनद्राविडकोंकणान्॥कर्णाटकांस्तथाभीरान्कलिंगांश्च
विवर्जयेत्॥एतद्देशापरसिंधुः॥अंगवंगकलिंगांश्चसौराष्ट्रान्गुर्जरांस्तथा॥आभीरान्कोंकणांश्चैवद्रा
विडान्दक्षिणापथान्॥आवंत्यान्मागधांश्चैवब्राह्मणान्सर्वविवर्जयेदितिब्रह्मपुराणेकेचिदाहुः॥युक्तंचैत
त्स्वस्थमनः॥अन्यथातद्देशीनांमातामहादिश्राद्धस्यानापत्तेः॥सवर्णाग्र्यासदापरासुरूपाधर्मनासह॥अ
त्रैश्राद्धिनानेतान्नरकेपातयेत्स्वगा॥संबंधिनस्तथासर्वान्दौहित्रंविट्पतिंतथा॥भागिनेयंविशेषेण
तथाबंधुरवर्गाधिपतिमद्यन्[illegible]॥केचित्कारणादेवयदाहेमाद्रौवाशिष्ठेनोक्तः॥कुष्ठाच्चकुन

स्वाधैन ह्रीनोपि विक्रियण एव च ॥ एतेभ्यः श्राद्धं समाहृतमिति दत्त्वा शास्त्रविवर्जिता इति ॥ बिह[illegible]स्मृतिसेते ग्रासहस्र[illegible]र्थः ॥ अपि चे
न्मंत्रविदुषः [illegible] शरीरे पंक्तिदूषणे ॥ अन्ते हव्यं तं यमः प्राह पंक्तिपावनमेव स इति स्मृतेः ॥ एवं परीक्ष्य श्राद्धार्हान्विवक्षि
तसंख्याकान् ब्राह्मणान् पूर्वेद्युः स्वयं कृत्वा सायं संध्यावंदनाग्निहोत्रहोमानंतरं निमंत्रयेत् ॥ तदुक्तं श्राद्धतिलके ॥
कृत्वा सायं स्वयं गत्वा श्रोत्रियान् [illegible] यथालयं ॥ निमंत्रयीत पूर्वेद्युः स्वशाखीयान् द्विजोत्तमान् ॥ स्वशाखीयद्वि
जाभावे द्विजानन्यान्निमंत्रयेत् ॥ स्वशाखीयानिति तु हेमाद्रिणा नादृतं [illegible] त्वादिति ॥ देवलः ॥ श्वः कर्तास्मीति
निश्चित्य सकृत्तान्विप्रान्निमंत्रयेत् ॥ निरामिषं सकृद्भुक्ता भुक्ते सर्वजने गृहे ॥ [illegible] सर्वजने भुक्त इत्यर्थः ॥ चंद्रि
कायां वाराहे ॥ वस्त्रशौचादिकं कृत्वा श्वः कर्तास्मीति जनतः ॥ स्थलोपलेपनं कृत्वा ततो विप्रान्निमंत्रयेत् ॥ दंतका
ष्ठं च विसृजेद्ब्रह्मचारी शुचिर्भवेत् ॥ निमंत्रणप्रकारमाह प्रचेताः ॥ दक्षिणं चरणं विप्रः सव्यं वै क्षत्रियस्तथा ॥
पादावादाय वैश्यो द्वौ शूद्रः प्रणतेषु चैकं ॥ निमंत्रयेदिति शेषः ॥ बृहस्पतिः ॥ उपवीती ततो भूत्वा देवार्थं तु द्विजो
त्तमान् ॥ अपसव्येन पित्र्यर्थे यथास्व[illegible]थवा सुतः ॥ मात्स्ये ॥ दक्षिणं जानुमालभ्य त्वं मयात्र निमंत्रित
इति निमंत्रणप्रयोगोपि ॥ प्रचेताः ॥ सवर्णेषि बयेदासं द्विजानां तु निमंत्रणे ॥ कर्तुर्वाप्यथ शिष्यादेः कार्यांतर
निमित्ततः ॥ अत एव स्कांदे ॥ राजकार्यनियुक्तस्य बंधनिग्रहवर्तिनः ॥ व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेदिति ॥
यमः ॥ अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमंत्रितं ॥ तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितमिति ब्राह्मणस्य द्वयो

रेवनिषेधात्क्षत्रियवैश्यकर्तृके श्राद्धे ब्राह्मणेन निमंत्रणे न दोषः ॥ अत एव हर्षप्रचेतो वचने सवर्णपदं संभवाभिप्रायं ॥ अथ ब्राह्मणसंख्या ॥ आश्वलायनसूत्रे ॥ एकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन्वा वृद्धौ फलभूयस्त्वमिति ॥ द्वौ द्वाविति वृद्धिश्राद्धपरमिति नारायणवृत्तिकृत् ॥ कात्यायनसूत्रेपि ॥ द्वौ दैवे त्रीन्पित्र्ये एकैकमुभयत्र वा मातामहानामप्येवं तंत्रं वा वैश्वदैविकमिति ॥ सूत्रांतरेपि ॥ दैवे युग्मानयुग्मान्यथाशक्ति पित्र्य इति ॥ अत्रापि म्यव स्वामाह गोतमः ॥ नवावरान्भोजयेदयुजो वा यथोत्साहमिति ॥ पराशरोपि ॥ संपत्तावर्थपात्राणामेकैकस्य त्रयस्त्रयः ॥ पित्रादिब्राह्मणाः प्रोक्ताश्चत्वारो वैश्वदेविके ॥ वृद्धयाज्ञवल्क्योक्तेपि ॥ त्रीनेकं पंच वा विप्रान्पार्वणे विनियोजयेत् ॥ वैश्वदेवे द्वौ चतुरो वोपवेशयेत् पित्रादीनामेकैकस्य स्थाने एकं त्रीन्वोपवेशयेदित्यर्थः ॥ अत एव मनुः ॥ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ॥ भोजयेत्सुसमृद्धोपि न प्रसज्जेत विस्तरे ॥ सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदं ॥ पंचैतान्विस्तरो हंति तस्मान्नेहेत विस्तरमिति ॥ वृद्धवसिष्ठः ॥ श्राद्धद्वयं करिष्यंस्तु दश वा चतुरोपि वा ॥ त्रीन्वा निमंत्रयेद्विप्रानेकं वा सत्यवादिनमिति ॥ अत्र विशेषमाह ॥ वृद्धवसिष्ठः ॥ शातातपः ॥ द्वौ दैवेऽथर्वणौ विप्रौ प्राङ्मुखावुपवेशयेत् ॥ पित्र्ये तूदङ्मुखांस्त्रीस्त्रीन्बह्वृचाध्वर्युसामगानिति ॥ नारदः ॥ ब्राह्मणेषूपविष्टेषु यनयः श्रोत्रियस्तथा ॥ दैवाद्यायाति श्राद्धेनान्विप्रपंक्तौ तु भोजयेदिति ॥ अशक्तौ हेमाद्रौ देवलः ॥ एकेनापीह विप्रेण षट्पिंडं श्राद्धमाचरेत् ॥ षडर्घ्यान्दापयेत्तत्र षड्भ्यो दद्यात्तथा हविः ॥ गोभिलः ॥ यद्येकं भोजयेच्छ्राद्धे दैवं तत्र भोज

येत्॥ कृतचौपयनं पि सामान्नित्रितयं तत्र विघने॥ अकामे तन्यविप्रं वा भोजयेन्न तु हापयेदिति॥ श्राद्धमिति शेषः॥
वसिष्ठः॥ यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्॥ अन्नं पात्रे समुध्य स सर्वस्य प्रकृतस्य च॥ देवतायतने दत्वा
ततः श्राद्धं समाचरेत्॥ प्रास्यदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे॥ एतच्च सपींडीकरणं वर्जं ज्ञेयं॥ नत्वेवैकं सर्वेषां
काममनाद्येइ साश्वलायनसूत्रात्॥ एतदर्थो नारायणवृत्तौ॥ आद्यं सपींडीकरणं॥ तद्वर्जे सर्वश्राद्धे कामं त्रयाणा
मेकं भोजयेत्॥ सपींडीकरणे तु नियतं त्रिभिर्भवितव्यं॥ यद्वानाद्ये पार्वणवै~~श्व साग्नेरग्निर्भवेत्सदा~~र्जितश्रा
द्धे अभोजने आमहेमश्राद्धे वा अन्नाभावे वेति व्याख्यांतरं॥ अत्र साग्नेर्विशेषमाह प्रचेताः॥ एकस्मिन्ब्राह्म
णे दैवे साग्नेरग्निर्भवेत्सदा॥ अनग्नेः कुशमुष्टिः स्याच्छ्राद्धकर्मणि सर्वशः॥ एकस्याप्यभावे हेमाद्रौ स्मृत्यंतरे॥
निधाय दर्भं निचये आसनेषु समाहितः॥ प्रैषानुप्रैषसंयुक्तं सर्वश्राद्धं प्रकल्पयेत्॥ अस्य स्वरूपमुक्तं प्राक्॥
मातृश्राद्धे तु विप्राभावे सुवासिन्यो भोज्या इत्याह शार्ङ्गे वसिष्ठः॥ मातृश्राद्धे तु विप्राणामलाभे भोजयेदपि॥
पतिपुत्रान्विता भव्या योषितो ह्यष्टौ कुलोद्भवाः॥ इति॥ अष्टावित्यविवक्षितं वृद्धिश्राद्धविषयं वा॥ तेन यथासं
भवं भोज्या इति॥ पाद्ये उत्तरखंडे॥ सहृदभ्यर्चितं लिंगं शालग्रामाच्छिलोच्चयः॥ पीठे संस्थापयित्वा तु श्राद्धं
यः कुरुते नरः॥ पितरस्तस्य तिष्ठंति कल्पकोटिशतं दिवीति॥ मात्स्ये॥ पठन्निमं स्वनियमां श्रावयेद्वैतकान्बु
धः॥ अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः॥ भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा॥ एवं सर्वेषु राम

त्रणासंभवे देवलः ॥ संभवे परे सुवर्णब्राह्मणं स्तां निमंत्रयेदिति ॥ यदहः संपद्येत तत्तदह ब्राह्मणान्नामंत्र्येति कात्यायनसूत्रमपि ॥ अथ श्राद्धकर्तृभोक्तृनियमः ॥ अपरार्के यमः ॥ केतनं कारयित्वा यो तिक्रामति वै द्विजः ॥ ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते ॥ अन्यत्रापि ॥ आमंत्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत् ॥ अतिकृच्छ्रासु घोरासु तिर्यग्योनिषु जायते ॥ आमाद्यत्यागे हारीतः ॥ प्रमादाद्धि स्मृतं त्यक्त्वा प्रसाद्यैनं प्रयत्नतः ॥ तर्पयित्वा यथान्यायं सर्वं तत्सुकृतमश्नुते ॥ हीनः सर्वत्यागे नारायणः ॥ एतस्मिन्नेव नाशिष्यामे ब्राह्मणो नियतः शुचिः ॥ यतिचांद्रायणं कृत्वा तस्मात्पापात्प्रमुच्यते ॥ इति ॥ इदं च श्राद्धार्हविप्रातिक्रमविषयं ज्ञेयं ॥ तेन प्रमादादनर्हमामंत्र्य तत्त्यागे न दोषः ॥ ब्राह्मणातिक्रमो नास्ति मूर्खे वेदविवर्जिते इति कात्यायनोक्तेः ॥ विप्रेणाप्यनिंद्यामंत्रणं न प्रत्याख्येयं ॥ अनिंद्येनामंत्रितो नापक्रामेदामंत्रितो वान्यदन्नं न प्रतिगृह्णीयादिति कात्यायनसूत्रात् ॥ हेमाद्रौ यमः ॥ आमंत्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति ॥ नरकाणां शतं गत्वा चांडालेष्वभिजायते ॥ देवलोऽपि ॥ पूर्वं निमंत्रितोऽन्येन कुर्यादन्यप्रतिग्रहं ॥ भुक्त्वा हारोऽपि वा भुंक्ते सुकृतं तस्य नश्यतीति ॥ मनुः ॥ केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः ॥ कथंचिदप्यतिक्रामन्पापात्सूकरतां व्रजेत् ॥ केतितो निमंत्रितः ॥ कथंचिदिति मिष्टान्नबहुदक्षिणादिलोभेन न त्वसामर्थ्यादिनेत्यर्थः ॥ विद्यमानो यतोऽतिक्रान्तः सोऽन्यान्नेन निमंत्रितः ॥ मदाल्लोभादतिक्रामन्पापः सूकरतां व्रजेदिति स्कांदोक्तेः ॥ यस्त्वामंत्रितो यथाकाले नायाति तद्दोषमादित्यपुराणे दत्त्रितिः ॥ आमंत्रितश्चिरं नैव कुर्याद्विप्रः कदाचन ॥ देवतानां पितॄणां च दातुरन्नस्य चैव हि ॥ चिरकारी भवेद्द्रोही पच्यते नरकाग्निनेति ॥ अन्य

त्रापि॥ श्राद्धभुक् प्रातरुत्थाय कुर्याद्दंतधावनं॥ श्राद्धकर्त्ता न कुर्वीत दंतानां धावनं बुध इति॥ इतिहासेपि॥ दंतधावनतांबू
लं क्षौराभ्यंगमभोजनं॥ रत्यौषधपरान्नं च श्राद्धकर्त्ता विवर्जयेत्॥ दंतधावनमभ्यंगं नखकेशनिकृंतनं॥ कर्त्ता भुक्ता
न पूर्वेद्युर्भोक्ता चैव परेहनि॥ पुनर्भोजनमध्वानं भारमायासमैथुनं॥ दानं प्रतिग्रहं होमं श्राद्धभुक्त्वष्ट वर्जयेत्॥
होममाकन्न होत्रादि द्व्यतिरिक्तं [illegible]॥ आमंत्रितस्तु यः श्राद्धे कलहं कुरुते नरः॥ भवंति पितरस्तस्य तं मासं मलभो
जनाः॥ आमंत्रितस्तु यो विप्रो ह्यध्वानं याति दुर्मतिः॥ भवंति पितरस्तस्य तं मासं पांसुभोजनाः॥ आमंत्रितस्तु यो वि
प्रो भारमुद्वहते द्विजः॥ पितरस्तस्य तं मासं भवंति स्वेदभोजनाः॥ आमंत्रितस्तु यो विप्रो हिंसां वै कुरुते द्विजः॥ तं मा
सं पितरस्तस्य भवंति रुधिराशनाः॥ शंखः॥ निमंत्रितस्तु यः श्राद्धे मैथुनं सेवयेद्द्विजः॥ श्राद्धं दत्वा च भुक्त्वा च युक्तः स्या
न्महत्तेन सः॥ मैथुनं च कृतं चापि निषिद्धं॥ [illegible] नो वा नैव गच्छेत्स्त्रियं क्वचित्॥ तत्र गच्छन्न वाप्नोति ह्यनि
ष्टानि फलानीति माधवीये॥ [illegible] कारि [illegible] श्राद्धं सर्वरात्रौ श्रयस्सुप्तः॥ व्यवायं भोजनं वापि
कृत्वा वापि विवर्जयेदित्याश्वलायनः॥ [illegible]॥ यदत्ता पितृसान्निध्ये रणा॥ श्राद्धकृत्तौ स्त्रियं गच्छेत्तो न दोषस्त्वकृतं॥ तत्वग
तिकमिति हेयं॥ बृहस्पतिः॥ दिनत्रं ब्रह्मचारी स्याच्छ्राद्धकृच्छ्राद्धभुक् सह॥ अन्यथा वर्त्तमानौ तु स्यातां निरयगा
मिनौ॥ पुनर्भोजनमध्ययनं भारमायासमैथुनं॥ श्राद्धकृच्छ्राद्धभुक्चैव सर्वमेतद्विवर्जयेत्॥ यदत्र श्राद्धक
त्रिकायां पुराणसमुच्चये॥ हस्तानुराधरं श्राद्धं विद्वान् श्राद्धमाचरेत्॥ एकं द्वे त्रीणि वा तत्र दिनानि परिवर्जयेदिति॥

श्रा

॥१५२॥ त्तत्तु गौडादय आद्रियंते ॥ न दाक्षिणात्याहुः ॥ हेमाद्र्यादिमहानिबंधेष्वनुपलंभादिति ॥ यमः ॥ कलहं च दिवास्वापं
भाराध्ययनमैथुनं ॥ संध्यां प्रतिग्रहं होमं श्राद्धभोक्ताष्ट वर्जयेत् ॥ अथ संध्यादिनिषेधः ॥ प्राक्प्रायश्चित्तात्‌दे
पः ॥ यथाहोशनाः ॥ दत्त्वाक्षतः पिबेच्चापो गायत्र्या श्राद्धभुग्द्विजः ॥ ततः संध्यामुपासीत जपेत जुहुयादपि ॥ जु-
हुयात्सागं कुर्यात् ॥ सूतके च प्रवासे च अशक्तौ श्राद्धभोजने ॥ एवमादिनिमित्तेषु हावयेन्न तु हापयेदिति कात्या-
यनोक्तेः ॥ सोमे सक्तौ ॥ वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतिं ॥ घोरायां ब्रह्महत्यायां युज्यते नात्र संशय इति ए-
तद्विहितेज्यादिव्यतिरिक्तपरं ॥ तथा ॥ वनस्पतिगते सोमेऽनडुहो यस्तु वाहयेत् ॥ नाश्नंति पितरस्तस्य दश वर्षाणि
पंच चेत्युदि ॥ एतेऽध्ययनादिनिषेधा यथायोग्यमुभयोरपि ज्ञेयः ॥ तदहः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्य-
वादी स्यादध्वमैथुनश्रमस्वाध्यायान्वर्जयेदामंत्रितोऽप्येवमिति कात्यायनस्मरणात् ॥ स्वयमशक्तो यदि पुत्रा-
दिभिः श्राद्धं कारयति तदा तेषां स्वस्यापि नियमाः स्युः ॥ न चाशक्तिः स्वयं कर्तुं यदा त्वयमनवकोरत्तः ॥ श्राद्धं शिष्ये-
ण पुत्रेण तदान्येनापि कारयेत् ॥ नियमानाचरेत्सोपि नियतांश्चैव संधरे ॥ यजमानोपि तान्सर्वानाचरेत्तु समाहि-
त इति वाराहोक्तेः ॥ सत्तद्धर्मा कर्मयोगादिति कात्यायनपरिभाषोक्तेश्च ॥ सः प्रतिनिधिः स्त्रियास्तु पात्रे ॥ भुक्तक-
ष्ठानुयान्नारी भुक्तकेशी न धैव च ॥ हसंते रुदते श्राद्धं निराशाः पितरस्तदा ॥ आश्वलायनः ॥ श्राद्धेहे भोजयेद्धास्तो-
न बालानपि यत्नतः ॥ प्राक्पिंडदानात् धान्यैषैः तिलं कुर्यात्स्वगृहे ॥ नास्तो गृहे ॥ अथ श्राद्धवस्तूनि ॥ संग्रहे ॥ ॥१५२॥

कौपीनं मलिनं रक्तं विचित्रं खंडं पराभुक्तं ॥ काषायं नाडू पीतं च वर्णं धौतमधौतकम् ॥ धीमानेवंविधं वस्त्रं वर्जयेत्पि
तृकर्मणीति ॥ व्यासः ॥ कौशेयं क्षौमकार्पासं दुकूलमहतं तथा ॥ दाने च परिधाने च श्राद्धकाले प्रशस्तमिति ॥
तत्रैव ॥ प्रातः स्नात्वा विधानेन श्राद्धाय कुष्ममाहरेत् ॥ समित्सुष्पकुशादीनां द्वितीयः परिकीर्तित इति ॥ अष्टधा
विभक्ते दिने द्वितीयभागे इत्यर्थः ॥ हेमाद्रौ यमः ॥ समूलस्तु भवेद्दर्भः पितॄणां श्राद्धकर्मणि ॥ मूलेन लोकां
ञ्जयति शक्रस्य तु महात्मनः ॥ व्यासः ॥ तर्पणादीनि कार्याणि पितॄणां यानि कानिचित् ॥ तानि स्युर्द्विगुणैर्दर्भैः
ससपत्रैर्विशेषतः ॥ शालंकायनः ॥ सपिंडीकरणं यावदृजुदर्भैः पितृक्रिया ॥ सपिंडीकरणादूर्ध्वं द्विगुणै
र्विधिवद्भवेत् ॥ पित्र्ये द्विगुणास्तु दर्भा इति कात्यायनसूत्रं ॥ द्विगुणा भुग्ना इत्यर्थः ॥ शंखः ॥ अनंतर्गर्भिणं
साग्रं कौशं द्विदलमेव च ॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥ समावप्रच्छिन्नाग्रावनंतर्गर्भौ प्रादे
शमात्रौ कुशौ पवित्रमिति कात्यायनश्रौतसूत्रं ॥ हारीतः ॥ पवित्रं ब्राह्मणस्यैव चतुर्भिर्दर्भपिंजुलैः ॥ ए
कैकन्यूनम ------------- कं ॥ स्मृत्यर्थसारे ॥ सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रंथितं नवं ॥ चतुराद्दिपवित्रं
तु काम्यादौ परिकीर्तितं ॥ स्कांदे ॥ अनामिकांधृता दर्भा हि कानामिकयापि वा ॥ द्वाभ्यामनामिकाभ्यां तु
धार्यं दर्भपवित्रकं इति ॥ पत्राभावे सुमंतुः ॥ समूलाग्रौ विगर्भौ तु कुशौ द्वौ दक्षिणे करे ॥ सव्ये चैव तथा त्री
न्वै बिभृयात्सर्वकर्मस्विति ॥ कुशाभावेऽपरार्के सुमंतुः ॥ कुशाः काशाः शरा गुंजो यवो दूर्वाथ बल्वजाः ॥

गोकेशामुंजकुंदाख्यदूर्वाभावे परः पर इति ॥ चित्रोपमाहान्तत्रां रवः ॥ कात्याह स्त्रेच नाचामेत्कदाचिद्द्विचित्रांकया ॥ प्रायश्चि
त्तेन पूज्यं तद्दूर्वाहस्तस्तथैव च ॥ न ब्रह्मग्रंथिनाचामेत्सर्वकर्मसु कर्मविदिति ॥ ब्रह्मग्रंथ्यादि लक्षणमुक्तं संस्कारहे
माद्रौ गारुडे ॥ संसर्ज्य वेष्टनं मार्गं ब्रह्ममार्ग विधिः स्मृतः ॥ सव्यस्य दक्षिणे हस्ते पवित्रमभिधीयते ॥ तद्ब्रह्मग्रंथि
मत्स्योक्तं पवित्रं वेदवादिभिः ॥ पवित्रकेतु [illegible] मुख्यः [illegible] दे नो ब्रह्ममार्ग इति तत्रैव व्याख्यातं ॥ ब्रह्मयज्ञे जपे चैव ब्र
ह्मग्रंथिर्विधीयते ॥ भोजने वर्तुलः प्रोक्तः एवं धर्मो न हीयते ॥ अस्यार्थः ॥ द्विगुणीकृतानां दर्भाणां वामां पार्श्वं प्रद
क्षिणामर्धवेष्टनं विधाय पश्चाद्भागेन [illegible] यदा प्रवेश्यते तदा वर्तुलो ग्रंथिः ॥ यदा स एव प्रादक्षिण्येन समर्धवेष्ट
नं विधाय पुरोभागेन प्रवेश्यते तदा ब्रह्मग्रंथिः ॥ एतद्ग्रंथिमत्पवित्रलक्षणमपि तत्रैव ॥ अर्धप्रदक्षिणीकृ
त्य त्रिशिखापार्श्वं प्रवेशयेत् ॥ वेष्टयेन्नैव मार्गेण ग्रंथिरेतत्त्रयं भवेत्पवित्रके ॥ इति ॥ वेस वेमार्गः पश्चाद्भाग इत्यर्थ इति
तत्रैव व्याख्यातं ॥ दर्भग्रहणादिप्रकारः स्मृत्याह्निकादौ द्रष्टव्यः ॥ गालवः ॥ अन्यानि च पवित्राणि कुशदूर्वा
त्मकानि च ॥ हेमात्मकपवित्रस्य कलां नार्हन्ति षोडशीमिति ॥ अथ हविः ॥ हेमाद्रौ प्रचेताः ॥ [illegible] माषास्तिला गोधू
मश्रेष्ठाः स्युः यवशालयः ॥ महायवा व्रीहियवा [illegible] मधूलिका ॥ कृष्णाः श्वेताश्च [illegible] श्यामाकाः स्युः श्रा
द्धकर्मणीति ॥ मधूलिका या [illegible] इति हेमाद्रिः ॥ खर्जूरास्यन्ये ॥ वार्त्तो ॥ वर्द्धमानं तिलं श्राद्धमक्षय्यं मनुरब्र
वीत् ॥ सर्वकामैः स जयते तिलैः पर्जन्यवृष्टिभिः [illegible] निति ॥ [illegible] ॥ चंद्रिकायां देवलः ॥ इत्याहतेम

९६

मत्ताहेत्वदर्श्नेहृद्यष्टकासु च ॥ [illegible] कालेषु नैवदेयं कुभोजनं ॥ अन्नैवैर्वर्त्तैं ॥ गोधूमाश्च यवाश्चैव समुद्गा
स्तथाल्कयः ॥ एतेसोमा स्समुद्भूतानि [illegible] ॥ तस्मात्तैर्दद्यात्पैत्रेश्राद्धेषु वंशजैः ॥ आ[illegible] यमंच यश्राद्धं माष
मुद्गविवर्जितः ॥ तैलपक्वेन [illegible] कृतमप्यु[illegible]दानि ॥ आम्ले ॥ यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा ॥
संतर्पयेत्पितॄन्मुद्गैः श्यामा[illegible]र्विदवैः ॥ नीवारैर्हरिश्यामाकैः प्रियंगुभिरथाचयावादिनि ॥ हेमाद्रौ का
र्ष्णाजिनिः ॥ यदिष्टं जीवतश्चासी[illegible] सम्प्रतिततः ॥ सा सोदुस्तरो मार्गं ततो यातिन संशयइति ॥ तद्वितमे
वानिषिद्धदानेश्राद्धेघातस्यवक्ष्यमाणत्वात् ॥ श्राद्धे हे[illegible]कथनं ॥ नर्थ्यध्याच्च ॥ आश्वलायनः ॥ कंदस्यादि
फलैः श्रास्तैः मूलैराद्रादिकैरपि [illegible]रसैर्मधुनार्द्रश्राम्राद्यैः संतर्पयेत्पितॄन् ॥ श्राद्धदीपे ॥ [illegible]शाकं महाशा
कं द्रोणशाकं तथार्द्रकं ॥ बीत्यामलक मद्वीकापनसाम्रं च दाडिमं ॥ च वंपाल्वेवता—ट स्वर्जुरं च कसरूकं ॥
कोविदारश्च कंदश्च पटोल बृहती फलं ॥ पिप्पलीमरीचं चैव एलाशुंठी च सैंधवं ॥ शर्कराखंड कर्पूरं च बदरी ग्र
द्रोणपत्रकं ॥ मार्कंडेयः ॥ गोधूमैरिक्षुभिर्मुद्गैः सतिलैश्चणकैरपि ॥ केचुकैश्च तथा कंदैः कर्कंधुबदरैरपि ॥
पालेवतैराहकैश्चाप्यक्षोटैः पनसैस्तथा ॥ काकोल्या क्षीरकाकोल्या तथा पिंडालुकैः शुभैः ॥ लाजाभि
श्च ----- पिस्कपुंसोयमि चिर्भटैः ॥ सर्षपाराजशाकाभ्यां मिंगुदै राजजंबुभिः ॥ प्रियालामलकैर्मुख्यैः फलै लुभि
श्चतिलशकैः ॥ कुरैः स्तालकंदैश्च कलिकाक्षीरिकावचैः ॥ लोचैःसमोचैर्लकुचैस्तथा चैवबीजपूरकैः ॥ श्रिय

॥१६५॥

कैः पयफलैर्भक्ष्यभोज्यैश्च संस्कृतैः॥ रागखांडवचोष्यैश्च त्रिजातकसमन्वितैः॥ दत्तैस्तु मासं प्रीयंते श्राद्धेषु
पितरो नृणामिति॥ सतीनकः कलायः॥ कलायस्तु सतीनक इत्यभिधानात्॥ चरकं वर्तुलधान्यं॥ केचुकः कं
चनारः॥ कंदस्सूरणादिः॥ तन्मात्रं वा॥ अर्शोघ्नः सूरणः कंद इत्युक्तेः॥ कर्कंधुर्बदरं॥ पालेवतं॥ कोशात
की॥ आरूकं मरूपीति कान्याकुब्जा आहुः॥ पोथेति महाराष्ट्राः॥ अक्षोटं अखरोटेति गुर्जरदेशे प्रसि
द्धं॥ काकोली क्षीरकाकोल्यौ गौडदेशे प्रसिद्धं॥ पिंडालुकं मोहलकंदेति महाराष्ट्रे प्रसिद्धं॥ पुत्रेसादय
स्त्रयः कर्कटीभेदाः॥ हर्षपेसत्रदीर्घश्चांदसः॥ उत्तरं प्रसिद्धं॥ प्रियालं चिरौंजीति मध्यदेशे प्रसिद्धं॥
फल्गु उदुंबरं॥ तिलं टंकं पटोलं॥ तालकंदः कंदविशेषः॥ वेत्रिकांति त्रिणीफलं॥ क्षीरिका खीरिणी
ति प्रसिद्धा॥ यचः फलविशेषः॥ शिंबं प्रसिद्धं॥ त्रिजातकं लवंगेलामरीचकं॥ तथा॥ मधुकं रामठं चैव
कर्पूरं गुडमेव च॥ श्राद्धकर्मणि शस्तानि सैंधवं पुत्रसत्तमेति॥ रामठं हिंगुः॥ पथ्यं चंद्रोदये श्राद्धे॥ आ
म्रमाम्रातकं बिल्वं दाडिमं बीजपूरकं॥ प्राचीनामलकं क्षीरं नारिकेलं परूषकं॥ नारंगकं च खर्जूरं द्रा
क्षा नीलकपित्थकं॥ एतानि फलजातानि श्राद्धे देयानि यत्नतः इति॥ याज्ञवल्क्यः॥ हविष्यान्नेन वै मासं
पायसेन तु वत्सरं॥ मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः॥ एणरौरववाराहशाशैर्मांसैर्यथाक्र
मं॥ मासवृद्ध्याभितृप्यंति दत्तैरिह पितामहा॥ इति॥ श्राद्धे मांसभक्षणे दोषमाह मनुः॥ नियुक्तस्तु य

॥१६५॥

थान्यायं यो मांसं नात्ति मानवः॥ स प्रेत्य पशुतां याति संभवानेकविंशतिं॥ इति हारीतोपि॥ नियुक्तस्तु यदि श्राद्धे दैवे वा
मांसं समुत्सृजेत्॥ यावंति पशुरोमाणि तावन्नरकमृच्छति॥ हेमाद्रौ देवलः॥ यच्छ्राद्धं मधुना हीनं तद्दैवैः सक
लैरपि॥ मिष्टान्नैरपि संयुक्तं पितॄणां नैव तृप्तये॥ अन्नमानमपि श्राद्धे यदि न स्यात्तु माक्षिकं॥ नामापि कीर्त्तनी
यस्मात्पितॄणां प्रीतये न तत् स्वादु बहुस्मृतिभिः श्राद्धे मधुमांसयोर्यत्प्राशस्त्येनोक्तं तद्युगांतरविषयं॥ कलिध स्य
र्मेषु वक्ष्याम्यस्मृतिभिः पृष्टः पारम्पर्योपदिष्टसदाचारैर्यतो मांसं निषेधति॥ यस्तु प्राणिवधं कृत्वा मांसेन त
र्पयते पितॄन्॥ सोऽविद्वांश्चंदनं दग्ध्वा कुर्यादंगारविक्रयं॥ क्षिप्त्वा कूपे यथा किंचिद्बालमादातुमिच्छति॥ एवम
ज्ञानतः सोपि मांसेन श्राद्धकृन्नर इति॥ श्रीभागवतेपि सप्तमस्कंधे पंचदशाध्याये॥ न दद्यादामिषं श्राद्धे
न चाद्याद्धर्मतत्त्ववित्॥ मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया॥ नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छ
तामिति॥ बादरायणोपि मांसं निषेधति॥ पृथ्वीचंद्रोदयेपि॥ अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु॥
देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेदिति निगमवचनं॥ हेमाद्रौ वरातिथिपितृभ्यश्च पशूपकारणं
तथा क्रियेति कलिवर्ज्यमादित्यपुराणवचनं च॥ बृहन्नारदीये॥ समुद्रयात्रास्वीकारः कमंडलुविधारणं॥ द्वि
जानामसवर्णासु कन्यासूपगमं तथा॥ देवराच्च सुतोत्पत्तिर्मधुपर्के पशोर्वधः॥ मांसदानं तथा श्राद्धे वान
प्रस्थाश्रमस्तथा॥ इमान्कलियुगे धर्मान्वर्ज्यानाहुर्मनीषिण इति वचनं च मांसं निषेधति॥ तस्मात्सुविधिः

॥१६६॥

धि

सं

कलिव्यतिरिक्तविषय इति सिद्धं ॥ केचिदास्तु स्वभावाः यथाचारं अदेयं तु मधुमांसादिकं तथा ॥ देशाचाराः
परिग्राह्यास्तत्तद्देशीयैर्नरैरिति ॥ बृहन्नारदीयवचनाद्यथाकुलाचारं मांसादिदानं तदभावे ऽवशिष्ट
ते यावित्याहुः ॥ तन्न ॥ होलाकादिकर[illegible]न्यायेन देशविशेषेण व्यवस्थाकल्पनायोगात् ॥ कलिनिषिद्धस
मुद्रयानादिस्वीकारापाताच्चेत्यलं प्रपंचेन ॥ [illegible]दो विशेषेणमाह सुमंतुः ॥ पयो दधि घृतं चैव गव्यं श्राद्धे
षु पावनं ॥ महिषीणां घृतं प्राहुः श्रेष्ठं न तु पयः क्वचित् ॥ मा[illegible] ॥ संधिन्यनिर्दशावत्सगोपयः परिव
र्जयेत् ॥ औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकं [illegible]से ॥ माहिषं चामरं मार्गमाविकैकशफोद्भवं ॥ स्त्रै
णमौष्ट्रं याचितं च दधिक्षीरं युजे[illegible] ॥ सगुडं मरिचाक्तं तु तथा पर्युषितं दधि ॥ दीर्घनक्रमपेतं च नष्टास्वा
दं च फेनवदिति ॥ यद्यपि याज्ञवल्क्य[illegible] अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितं ॥ अस्नेहा अपि गोधू
मयवगोरसविक्रियाः इति पर्युषित[illegible]स्यादि भोज्यमुक्तं तथापि गुडमरीचाक्त[illegible]दिनिषेधपर इति हेमाद्रिः ॥
तथा ॥ कालशाकं तन्दुलीयं वास्तूकं मूलकं तथा ॥ शाकमारण्यकं चैव [illegible] ह्याडे सुनिषण्ण इति तन्दुली
यं महाराष्ट्रे शुमाठ इति प्रसिद्धं ॥ मूलकं मारिष्यं न तु याम्यं ॥ वचनमात्स्ये [illegible] ॥ अन्यदपि वर्ज्यं माह
कं याह ॥ ॥ अथ वर्ज्यं ॥ मार्कण्डेयपुराणे ॥ यच्चोत्कोचादिना प्राप्तं पतिता यदुपार्जितं ॥ अन्यायक
न्याशुल्कार्थं द्रव्यं चात्र विगर्हितं ॥ [illegible] नक्तं यच्चाप्युपाहृतमिति ॥ शंखः ॥ [illegible]
[illegible]स्सुरसां ॥ [illegible]पालंक्यां [illegible]कं तथा ॥ कूष्मांडमलाबुवार्ताकं कोविदारांश्च वर्जयेत् ॥ [illegible]मसक्षीरं च

॥१६६॥

चैव तथा चैव पिंडमूलकं ॥ हारीतः ॥ मंडूकपर्णी सर्वं च श्राद्धं च विवर्जयेत् ॥ अत्र कोविदारमरीचादीनां निषेधः सोपि
सर्वैर्विहितत्वाद्विकल्पः ॥ एवं हिंगुबीजपूरादीनामपि ॥ यद्वा पिप्पलीहिंगुमरीचानां आर्द्राणां निषेध इति हेमा
द्रिः ॥ कृष्णलवणं काश्मीरदेशप्रसिद्धं ॥ सुरसा निर्गुंडीति माधवः ॥ पालंक्या पालकेति प्रसिद्धा ॥ कंचुकं जलजः शाकः
तथा शंखः ॥ राजमाषान्मसूरांश्च कोद्रवान्केकदूषकान् ॥ लोहितान्वृक्षनिर्यासान् श्राद्धकर्मणि वर्जयेत् ॥ पिंडालु
कं च तुंडीरं करमर्दं च नालिकां ॥ कुष्मांडं बहुबीजानि श्राद्धे देवाव्रजसध इति ॥ पिंडारकं पेठरमिति प्रसिद्धं ॥ तुंडी
रं बिंबीरफलं ॥ करमर्दं करवंद इति प्रसिद्धं ॥ यमः ॥ [illegible]गलोच्छिष्टमाघ्रातं श्राद्धे यत्नेन वर्जयेत् ॥ कुष्मांडं म
हिषीक्षीरं माढक्यो राजसर्षपाः ॥ वरणकाराजमाषांश्च घ्नंति श्राद्धं न संशयः ॥ माधवीये चतुर्विंशतिमते ॥ या
वनालकुलित्थांश्च वर्जयेत्तु दिनक्षलः ॥ मसूरांजनपुष्पं च विडंगमारिचानि चेति ॥ अत्र यावनलादीनां वि
हितनिषिद्धत्वाद्विकल्प एव ॥ यद्वा [illegible] राजसविषये तेन व्यवस्थेयं ॥ मुन्यन्नैः स्यात्सरा प्रीतिरिति भा
गवतोक्तेः ॥ राजसतामसाहाराणां भगवद्गीतायां ॥ आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः ॥ रस्याः
स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥ आहारा राजस
स्येष्टा दुःखशोकामयप्रदाः ॥ यातयामं गतरसं पूतिपर्युषितं च यत् ॥ उच्छिष्टमपि चामेध्यं भोजनं तामसप्रि
यमिति ॥ एतत्त्वं दिकायां मत एवमाह ॥ दातुश्च यस्मिन्मनसोऽभिलाषः श्राद्धं स्वदेयं तत्र च दीयमाने ॥ श्राद्धेषु

॥१६५॥

देयं विधिसंप्राप्तिष्ठं तद्दत्तमक्षय्यमिति ब्रुवंतिइति॥ पैठीनसिः॥ रक्ताकल्पिकापोताकुसुंभाश्मंतकानि च॥
जावदुष्टं क्रियादुष्टं शब्ददुष्टं तथैव च॥ श्राद्धेष्वेतान्यदेयानि यच्चाभक्ष्यं प्रकीर्तितमिति॥ पुरुषार्थत
या प्रतिषेधकस्त्रैणोपुयदस्यस्थलेनोक्तं तच्च श्राद्धेन देयमिति सर्वार्थः॥ अथ वर्ज्यजलं ब्रह्मांडे॥ दुर्गंधि
फेनिलं क्षारं पंकिलं पल्वलोदकं॥ न भवेद्यत्र गोतृप्तिर्नक्तं यच्चाप्युपाहृतं॥ अन्नसर्वार्थमुत्सृष्टं य
च्चाभोज्यं निपानजं॥ तद्वर्ज्यं सलिलं तात सदैव श्राद्धकर्मणि॥ कुत्रचित्स्मृतिप्रसंगमाह नारदः॥
स्नान पर्युषितं पुष्पं स्वजेत्पर्युषितं जलं॥ वनसजेज्जान्हवीतोयं तुलसीबिल्वपद्मकमिति॥ मासे
कुतपस्तु प्रोक्ताः॥ मध्यान्हः खड्गपात्रं च तथा नेपालकंबलः॥ रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृ
तः॥ पापं कुत्सितमित्याहुस्तस्य संतापकारिणः॥ अष्टावेते यतस्तस्मात्कुतपा इति विश्रुताः॥ मध्यान्हः
श्राद्धारंभे ग्राह्याः॥ अन्यथा यथायोग्यं ग्राह्यं॥ अपराह्णे स्मृतः सौरे॥ अपसं दुहितुश्चैव खड्गपात्रं तथैव
च॥ घृतं च कपिलायागोर्दौहित्रमिति कीर्तितं॥ ब्रह्मांडे॥ अमावास्यागते सोमे पादं तु खादति गोस्त
नं॥ तस्या गोर्यद्भवेत्क्षीरं तद्दौहित्रमुदाहृतं॥ उच्छिष्टं शिवनिर्माल्यं वमनं मृतकर्पटं॥ श्राद्धे सप्त पवित्रा
णि दौहित्रः कुतपस्तिला इति॥ उच्छिष्टं वत्सोच्छिष्टं दुग्धं॥ शिवनिर्माल्यं गंगोदकं॥ वमनं मधु॥ मृ
तकर्पटं पट्टं॥ तिला नाना हापस्त्रिंवः॥ अष्टम्यादौ समुत्पन्नां अदृष्टफलिकां तास्तथा॥ ते वै श्राद्धे पवित्राः

॥१६५॥

दे

सुरभावेग्राम्यकाश्रपि॥ गोरसः कृष्णाः स्तश्चानीलाश्चैवाभ्यविविधास्तिलाः॥ इति॥ एवमुक्तप्रकारेणान्ना
र्हद्रव्यसंपाद्यपाकारंभः कुर्यात्॥ तथा चोक्तमा॥ गोमयोदकैर्भूमिं भाजनं भांडं शौचं कुर्यादिति॥ भू
मिर्गृहप्रदेशः॥ भाजनं पाकपात्रं॥ भांडं तंडुलाद्यासादनपात्रं॥ पुरस्कारः॥ गृहाग्निशिशुदेवानां अस्तचा
रितपश्चिनां॥ तावं न दीयते किंचिद्यावत्पिंडं न निर्वपेत्॥ कौर्मे॥ तिलान्नावकिरेत्तत्र सर्वतो बंधयेदजा
न्॥ असुरोपहृतं सर्वं तिलैः शुध्यत्यजेन चेति॥ देवलः॥ तथैव यंत्रितो दाता प्रातः स्नाता धृतांबरः॥
आरभेत नवैः पात्रैः रन्धारंभं च बांधवैः॥ अत्रात्मनेपदात्स्वयमेव कर्तृत्वान्मुख्यः पाकः॥ गौणे तौ पत्न्या॥
तदशक्तौ बांधवैः॥ इति विवेकः॥ आश्वलायनः॥ समानप्रवरैर्मित्रैः सपिंडैश्च गुणान्वितैः॥ कृतो
पकारिभिश्चैव पितृकार्यं प्रशस्यते॥ अपि च॥ रजस्वलां च पाखंडं पुंश्चलीं पतितां तथा॥ त्यजेच्छूद्रां
तथा वंध्यां विधवां चान्यगोत्रजां॥ व्यंगकर्णी चतुर्थाहः स्नातामपि रजस्वलां॥ वर्जयेच्छ्राद्धपाकार्थं मातृ
पितृवंशजां॥ मातृपितृवंशाभिन्नां त्यजेदित्यर्थः॥ स्मृत्यंतरे॥ न पाकं कारयेत्पुत्रीमन्यां वाप्यन्यगोत्रजां॥
मृतवंध्यां च गर्भिणीं चैव दुर्मुखीमिति॥ अत्र पुत्रीनिषेधः पत्न्यादिसंभवे वेदितव्यः॥ चंद्रिकायां
यमः॥ कुक्कुटो विड्वराहश्च काकश्वायबिडालकः॥ वृषलीपतिश्च वृषलः षंढोऽवीरा रजस्वला॥

एतत्तु श्राद्धकाले वै वर्जनीयाः प्रयत्नतः इति ॥ तथा ॥ पादुकोपानहौ छत्रं चित्ररक्तांबरं तथा ॥ र[illegible]पुष्पं च मार्जा-
रं श्राद्धभूमौ विवर्जयेदिति ॥ अथ पाकभांडानि हेमाद्रौ नागरखंडे ॥ सौवर्णान्यथ रौप्याणि कांस्यताम्रोद्भवा-
नि च ॥ मन्मयान्यपि शस्यानि नूतनानि दृढानि च ॥ आदित्यपुराणेपि ॥ पचेदन्नानि सुस्नातः पात्रेषु शुचि-
षु स्वयं ॥ अच्छिद्रेष्वविलिप्तेषु तथानुपहतेषु च ॥ नायसेषु न भिन्नेषु दूषितेष्वपि कर्हिचित् ॥ सुवर्णरजतोपये-
गेषु मन्मयेषु न तु क्वचित् ॥ वायुपुराणे ॥ न कदाचित्पचेदन्नं मयस्थालीषु पैतृकं ॥ अयसो दर्शनादेव पितरो
विद्रवंति हि ॥ कालायसं विशेषेण निंदंति पितृकर्मणि ॥ फलानां चैव शाकानां छेदनार्थानि यानि तु ॥ महान-
से नियुक्तानां तेषामेव हि संनिधिः ॥ [illegible]तेनेतरस्याश्च गात्रमात्रस्य दर्शनं ॥ श्राद्धे दृष्टं तु विदुषा पितॄणां
प्रीतिमिच्छता ॥ महानसे नियुक्तानामायसानामपि [illegible]यं न दर्शनं ॥ तथैव ॥ पचमान[illegible]षं डेषु [illegible]न्यथा ताम्रमयेषु
च ॥ समुद्धरति वै घोरात्पितॄन्दुःखमहार्णवात् ॥ तैजसानामभावे तु दिद्रहरे[illegible]न्मयेपि च ॥ नवेष्टु चो प्रकु-
र्वीत पाकं पित्र्यर्थमादरादिति ॥ तथा ॥ पक्वान्नस्थापनार्थे तु शस्तं ते दारुजान्यपि ॥ र[illegible]दीन्यपि कार्या-
णि यज्ञियैस्तपि दारुभिः ॥ विवाहे प्रेतकार्ये च मातापित्रोः क्षयेहनि ॥ नवभांडानि कुर्वीत यस्य कस्ये विक्रे-
वतः ॥ इति ॥ अथ पचनाग्निः ॥ हेमाद्रौ प्रजापतिः ॥ औपासनेनाग्निसिद्धिरग्नौकरणमेव च ॥ लौकिके ना

ग्निना नापि श्राद्धं कुर्यात्स्वयत्नत इति ॥ अग्निरूपः [illegible] र्मप्रदीपे । प्रातर्होमं तु निर्वृत्य समुद्धृत्य हुताशनात् ॥ शेषं
महानसे हृत्वा तत्र पाकं समाचरेत् ॥ पाकानंतर्गिनं [illegible] स्वगृह्याग्नौ तु पुनः क्षिपेत् ॥ [illegible] वैश्वदेवादि कर्म
कुर्यादित्तं द्विजः ॥ इति कर्का[illegible]योऽप्येवमेवाह [illegible] स्य धेनो[illegible] मंत्रमि सत्र ॥ अन्यमा[illegible] ॥ तत्र पंचसु [illegible]नानि निर्वा
पानंतरं शाने ॥ वैवाहिके ग्नावध्यन्यत्र लौकिके वापि संस्तन इति ॥ निर्वाप्रकारस्तु वायु[illegible]पुराणे । पित्रर्थं निर्वपेद्भूमौ कुर्चैर्वा
दर्भसंस्कृते ॥ अग्निमान्निर्व[illegible] येवं च [illegible] सममुष्टिभिः ॥ पित्र्यो निर्वपामीति सर्वं दक्षिणतो न्यसेदिति ॥ चरुग्रह
णान्नभक्ष्यशाकादावि निहेमा[illegible] ॥ पिं[illegible]ति चिरु[illegible] यं निर्वाप[illegible] ॥ आश्वलायनो [illegible]सत्यपि स्मार्तेग्नौ पच
नाग्नावेव पाकः कार्य इत्युक्तं ॥ इहैवास्मिन्न[illegible] तंवदा इत्यर्थ[illegible] ॥ मथीयामरणीभ्यामग्निं मंथेत्स पचनाग्नि
र्भवतीति सूत्रेण दृष्टत्वाच्च ॥ बोधायन[illegible] ॥ [illegible] पहृत पचना[illegible]ासनं वाभिप्रज्वलंतीति ॥ इदमपि सर्वाधानवि
षयं ॥ अर्धाधानपक्षे तु वैश्वदेवं श्राद्धं चौपासनाग्नावेव कार्यमिति [illegible] आहुः ॥ विधुरादेस्त्वग्निब्रह्मचार्या
दीनां च षष्ठ्यादिविधानेनाग्निसंपाद्यत्तेनैव श्राद्धं कार्यमिति हरिहरभाष्यमुक्तं ॥ एवं यथासंभवं मग्निनापाकं का
रयित्वाभिमंत्रित ब्राह्मणान्नार्थं [illegible] पिप्रियत्वार्चनसाधनद्रव्याणि सज्जी कुर्यात् ॥ यथाह मार्कंडेयः ॥
अन्हः षण्मुहूर्तेषु गतेषु प्रयतो द्विजान् ॥ प्रत्येकं प्रेषयेत्प्रेष्यान्प्रदायामलकोदकं ॥ अत्रामलकमलकमन्यो
कं न्यलक्षणं ॥ यथाह देवलः ॥ ततो निवृत्ते मध्याह्ने लुप्तलोमनखान्द्विजान् ॥ अभिगम्य यथान्यायं प्रयच्छेद्दंतधा

॥१६८॥

व

वनं ॥ तैलमभ्यंजनं स्नानं स्नानीयं च पथ्यग्विधं ॥ पात्रेरौदुंबरेर्ध्याद्वैभ्यो द्विकपूर्वकं ॥ औदुंबरैस्ताम्रमयैः ॥ अ
श्वौरामलकस्नानादिकं निषिद्धमिति थ्यादित्यनिमित्तविषयमिति हेमाद्रिः ॥ निषिद्धेपि कार्यमित्यन्ये ॥ तैलमुद्व
र्त्तनं देयं ब्राह्मणेभ्यः प्रयत्नतः ॥ तैरभ्यंगश्च कर्त्तव्या वर्ज्यकालेष्वपि ध्रुवमिति कात्यायनोक्तेरिति ॥ दंतधाव
नं तैलस्नानादिकं तु निषिद्धं प्रागेव ॥ स्नाताधिकारी भवति दैवे पित्र्ये च कर्मणि ॥ श्राद्धकृच्छुक्लवासाः स्यान्मौ
नी च विजितेंद्रियः ॥ मनुः ॥ नग्नः स्यान्मलके वासा नग्नः कौपीनकेवलः ॥ द्विकच्छोत्तरीयश्च अकच्छो वस्त्र
एव च ॥ नग्नः काषायवासः स्यान्नग्नश्चार्द्रपटः स्मृतः ॥ नग्नो द्विगुणवस्त्रः स्यान्नग्नो दशापटः स्मृतः ॥ न
ग्नस्तु दग्धवस्त्रः स्यान्नग्नः स्यूतपटस्तथेति ॥ ततः केशान् गोपीचंदनादानोर्ध्वपुंड्रं कुर्यात् ॥ जपहोमे तथा दा
ने स्वाध्याये पितृकर्मणि ॥ तत्सर्वं नश्यति क्षिप्रमूर्ध्वपुंड्रं विना कृतमिति हेमाद्रावुक्तेः ॥ यज्ञो दानं जपो होमः
स्वाध्यायः पितृकर्म च ॥ वृथा भवति विप्रेंद्र ऊर्ध्वपुंड्रं विना कृतमिति बृहन्नारदीयात् ॥ ऊर्ध्वं च तिलकं कु
र्याद्दैवे पित्र्ये च कर्मणि ॥ तिर्यक्पुंड्रं न कर्त्तव्यं श्राद्धकाले विशेषतः ॥ इति रुद्रपराशरोक्तेश्च ॥ अन्ये तु ऊर्ध्व
पुंड्रं द्विजातीनामग्निहोत्रसमो विधिः ॥ श्राद्धकाले तु संप्राप्ते कर्त्ताभोक्ता च तत्स्मृते ॥ तथा ॥ वामहस्ते तु द
र्भांस्तु गृहे रंगावलिस्तथा ॥ ललाटे तिलकं दृष्ट्वा निराशाः पितरो गता इति संग्रहस्मृतेः ॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा चं
द्राकारमथापि वा ॥ श्राद्धकर्त्ता न कुर्वीत यावत्पिंडान्न निर्वपेदिति विश्वप्रकाशोक्तवचनाच्चोर्ध्वपुंड्रमपि न

न

॥१६८॥

नी

न कार्यमित्याहुः ॥ अत्राचाराद्व्यवस्था ॥ यद्वाऽयं निषेधो गंधपरः ॥ प्राक्पिंडदानाद्गंधाद्यैरलंकुर्याद्विप्रानित्याश्वला
यनोक्तेः ॥ ललाटे पुंड्रकं दृष्ट्वा स्कंधे कमाल्यं तथैव च ॥ निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिमिति हेमाद्रावुदाहृतवच
नस्य माल्यसाहचर्याच्च ॥ यद्वाऊर्ध्वपुंड्रविधिर्विप्रविषयः निषेधः कर्तृविषय इति पृथ्वीचंद्रोदये ॥ दानाध्ययन
देवार्चाजपो होमव्रतादिकान् ॥ न कुर्याच्छ्राद्धदिवसे प्राग्विप्राणां विसर्जनादिति ॥ इति ॥ अत्र देवतार्चनजपहो
मव्रतादिनिषेधस्तु नित्यव्यतिरिक्तकाम्यपरः ॥ नित्यकर्मणां स्वकालकरणातिक्रमे दोषश्रवणात् ॥ अहरहः
कुर्यादिति विधेश्च ॥ संध्याद्यकरणप्रसंगाच्च ॥ अत्रैव वह्न्याहिताग्निभिः पृथक्पाकेन श्राद्धपाकेन वा वैश्वदे
वं कृत्वा श्राद्धमारभेत् ॥ श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः ॥ एकादशाहिकं मुक्त्वा तत्र ह्यंते विधीयत इति हे
माद्रौ शालंकायनोक्तेः ॥ स्मार्ताग्निमात्रवतां तद्रहितानां चाग्नौकरणोत्तरं विकिरोत्तरं वा होममात्रं पृथक्पाकेन
कार्यम् ॥ तन्नयत्तां तु श्राद्धांत एव ॥ वैश्वदेवाहुतीरग्नावर्वाक् ब्राह्मणभोजनात् ॥ जुहुयाद्भूतयज्ञादि श्राद्धं कृ
त्वा समाचरेदिति ॥ प्रचलांडोक्तेः ॥ पित्रर्थं निर्वपेत्पाकं न पित्र्यं वैश्वदेविकमिति पृथक्पाको लौगाक्षिणोक्तेः ॥
सर्वेषां श्राद्धांते श्राद्धपाकेन वैश्वदेवमिति तृतीयः पक्षः ॥ श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः ॥ कुर्याद्भि
क्षां ततो दद्याद्धंतकारादिकं तथेति पैठीनसिस्मृतेः ॥ ततः श्राद्धशेषादिस्वार्थः ॥ श्राद्धान्हि श्राद्धशेषेण वैश्वदेवं स
माचरेदिति चतुर्विंशतिमताच्च ॥ अत्रानग्निकाकारेण प्रकारांतरेण व्यवस्थोक्ता ॥ वृद्धावादौ क्षये चांते दर्शे म

२

ध्येमहालये॥एकोद्दिष्टेनिवृत्तेतुवैश्वदेवोविधीयते॥आनि॥तेनिरग्नीयाणांतुसाग्नीनांसर्वश्राद्धे वै[illegible]वदेवःपंचयज्ञा
स्तंतइतिसुदर्शनभाष्ये उक्तं॥अनग्नीनांतेषामपि पूर्ववत्तु॥कात्यायनमतेनांतुसाग्नीनांश्राद्धपाकेनादावेववै
श्वदेवइतिकर्काचार्याः॥भिन्नपाकेनेति[illegible]का॥निरग्नीनांसर्ववचनचश्राद्धपरान्तरारस्तु॥वैश्वदेवंकदाकार्यं
श्राद्धेचसमुपस्थिते॥पाकशुद्ध्यर्थमेवैत[illegible]र्वमेवविधीयते॥संप्राप्तेपार्वणश्राद्धएकोद्दिष्टेतथैवच॥अ
ग्रतोविश्वेदेवस्यासश्राद्धेकादशाहे निदशांतेक[illegible]वीपिश्राद्धपाकेनादौकुर्यादिसाह॥पाकशुद्धिरेकपाके
चहेतुः॥कर्त्तव्यंपाकशुद्ध्यर्थंतुकोद्दिष्टेव[illegible]तितत्रैवहेतुंतरंचोक्तं॥तथाचयाज्ञवल्क्यः॥अपवित्रोभ
वेत्पाकोवैश्वदेवविवर्जितः॥न[illegible]तंपितृभिर्दैवै[illegible]सूतकंभवेत्॥अथासादनीयानि॥ब्रह्मांडे॥उप
मूलसतूलानांतुशास्त्रेपक[illegible]॥एवंतिलानां[illegible]कास्यमय[illegible]तुर्द[illegible]ता॥पात्रादिजनताम्राणिपा
त्राणिस्युःशमिमधुं॥पुष्पं[illegible]पसुगंधादि[illegible]षण[illegible]ति॥[illegible]॥व्रतीनानामसंवृत्री
समरोक्तेः॥श्यामिश्राद्धविन्नो[illegible]हमादेकार्ष्णाजिनः॥[illegible]शिथिलीकृतसर्व[illegible]॥चाद स्वा
द्विपत्नीर्थेनपठन्हुंफडुसहस्रसंख्या[illegible]॥अप्रसन्नाः[illegible]दर्भाःप्रसन्ना[illegible]॥समूलाः
कुशपाःप्रोक्ताश्छिन्नाग्राःस्तरणेस्मृताः[illegible]पुष्पस्निग्धाःसमाःशुभाः॥प्रादेशपरिमाणाः

ना स्युः पितृतीर्थेन संस्पृताः ॥ अग्निगाए ॥ [illegible] द्रष्टव्या ऽत्र प्रमाणतः ॥ कुतपाद्यत्रि विज्ञेयास्तैस्तु श्राद्धं समाचरेत् ॥
मध्यान्हः खड्गपात्रं च तथा नेपालकंबलः ॥ रौप्यं दर्भास्तिला गावो दौहित्रः कुतपाः स्मृताः इति ॥ [illegible] दक्षिणेनानु[illegible] प्र
गवाद्देवलः ॥ ततः स्नातान्निवृत्तेभ्यः प्रत्युत्थाय कृतांजलिः ॥ पाद्यमाचमनीयं च संप्रयच्छेद्यथाक्रमं ॥ इति ॥ आरंभ
कालमाहापरार्के गौतमः ॥ आरंभैः कुतपप्रायं श्राद्धं कुर्यात् रौहिणं बुधः ॥ विधिज्ञो विधिमास्थाय रौहिणं तु न लंघये
त् ॥ एतदेकोद्दिष्टे ॥ पार्वणे तु माध्ये [illegible] कुतपाद्यमनु[illegible] त्तं चानुरूप्यं ॥ [illegible] तंत्र चक्रं [illegible] वनामिच्छ
ते ॥ मध्यान्हे सर्वदा यस्मान्मंद[illegible] ति भास्करः ॥ [illegible] भोगवान्प्राप्यते इति ॥ श्राद्धं कालिकायां ना ना
रदीये ॥ स्नात्वा मध्यान्हि प्रायश्चित्तादिषु [illegible] भोगानु[illegible] ॥ दत्वा द्दैव्र [illegible] कुर्याद्विधानेनेति ॥ आ
यश्चित्तप्रकारस्तु धर्मप्रदीपे ॥ स्नात्वा माध्यान्हिकं [illegible] अनिमंत्रितान् ॥ आसनभाजनभांडादिशुद्ध्य
र्थं मंत्रमुच्चरेत् ॥ पुंसूक्तं च कुष्मांडं पावमानं कं ॥ नू[illegible]मिसादिकान्मंत्रान् ब्राह्मणैः सह संपठेत् ॥ प्रायश्चित्तनिमि
त्तं तु सूक्तं यच्चाति लोदकं ॥ कुर्याच्छ्राद्धेषु सर्वेषु तीर्थेनेव [illegible] दाचनं ॥ स ब्राह्मणो मंत्रपूतैः सहिरण्यकुशोदकैः ॥
सर्वमभ्युक्षेद्द्रव्यं कर्त्ता श्राद्धं समाचरेदिति ॥ स ब्राह्मणो ब्राह्मणसहित इत्यर्थः ॥ स्मृतिचंद्रिकायां वायवीयेपि ॥
कुकुट्टो विड्वराहश्च काकश्चाथ बिडालको ॥ वृषलीपतिश्च वृषलः षंढो वीरा रजस्वला ॥ खंजः कूणः
कुणिः [illegible]क्षीदातुः श्वेष्यकरस्तथा ॥ न्यूनांगो प्यतिरिक्तांगो योगी माहिषिकस्तथा ॥ अन्नपः श्व[illegible]युक्तो रेत्नु यदि

वैहायसकव्ययोः॥ उत्सर्ज्यं प्रधानार्थसंस्कारस्यापरिस्मृतः॥ आद्रवसोथकुर्यां स्वः पावमान्यस्तरत्समाः॥
पूतेनयाद्रियाद्दैरेन्नेदोषमपानुदेदिति॥ अथश्राद्धपरिभाषा॥ कात्यायनः॥ दक्षिणंपातयेज्जानुंदेवान्प
रिचरन्सदा॥ पातयेदितरंजानुंपितॄन्परिचरन्सदा॥ बौधायनः॥ प्रदक्षिणंतुदेवानांपितॄणामप्रदक्षिणं॥
देवानामृजवोदर्भाः पितॄणांद्विगुणाःस्वधा॥ शंखः॥ आवाहनार्घ्यसंकल्पपिंडदानान्नदानयोः॥ पिंडा
भ्यंजनकालेतुतथैवांजनकर्मणि॥ अक्षय्यासनयोःपाद्ये क्षणेगंधादिकार्चने॥ अवनेजनकालेपिना
मगोत्रादिकीर्तयेत्॥ मात्स्ये प्रयोगक्रमदक्षः॥ संबंधंप्रथमंब्रूयाद्गोत्रनामतथैवच॥ पश्चाद्रूपंविजा
नीयात्क्रमएषसनातनः॥ इति॥ वस्वादिरूपंतत्प्रोक्तंप्राक्॥ कश्यपः॥ सकारेणतुवक्तव्यंगोत्रंसर्वत्रधी
मता॥ सकारःकुतपोज्ञेयःतस्माद्यत्नेनतंवदेत्॥ नसयोगोयथाकाश्यपसगोत्रेस्यादि॥ तथा॥ गो
५ त्रस्यत्वपरिज्ञानेकाश्यपंगोत्रमुच्यते॥ तस्मादाहश्रुतिःसर्वाःप्रजाःकाश्यपसंभवाः॥ यत्तुसत्याष
ढं॥ अथाज्ञातबंधोःपुरोहितगोत्रेणाचार्यगोत्रेणचेति॥ तत्क्षत्रियादिपरंविवाहपरंवाद्रष्टव्यं॥
नामोच्चारेविशेषमाहबौधायनः॥ शर्मांतंब्राह्मणस्योक्तंवर्मांतंक्षत्रियस्यतु॥ गुप्तांतंचैववैश्यस्यदासां
तंशूद्रजन्मनः॥ पित्रादिनामस्थानेसएवाह॥ पृथिवीषसितावाच्यास्त्वसितान्यांतरिक्षसत्॥ अभिधानाप
रिज्ञानेदिविषत्स्यापितामहस्येति॥ एतदापस्तंबादिपरं॥ आश्वलायनानांतुतत्सूत्रेयदिनामान्यविद्यात्तत॥

पितामह प्रपितामहेत्ति क्रमादिति विशेषोक्तेः॥ पुंस्त्वं स्याविवक्षितत्वान्मातापितामही सत्त्वेयं॥ हेमाद्रौ नारायणः॥
विभक्तिभिस्तु यत्किंचिद्दीयते पितृदैवते॥ तत्सर्वं सफलं ज्ञेयं विपरीतं निरर्थकं॥ अत्र विशेषः॥ स्मृत्यर्थसारे॥ अर्घ्या
प्यासनयोः षष्ठी द्वितीयावाहने स्मृता॥ अन्नदाने शेषाः संबुद्धयः स्मृताः॥ यत्तु॥ चतुर्थी चासने नित्यं संकल्पे च
विधीयते॥ प्रथमा तर्पणे प्रोक्ता शेषाः संबुद्धयः स्मृता इति व्यासेनोक्तं॥ तत्र शाखाभेदेन व्यवस्थितेति हेमाद्रिः॥
तथा प्रभासखंडे॥ यज्ञोपवीतिना कार्यं दैवकर्म प्रदक्षिणं॥ पित्र्यमपि विशेषमाह जमदग्निः॥ सकृत्स्नातो च जपं स
क्यापिंडाघ्राणं च दक्षिणं॥ आव्हानं स्वागतं चार्घ्यं विनाच परिवेषणं॥ विसर्जनं सौमनस्यमाशिषं प्रार्थनं तथा॥
विप्रप्रदक्षिणं चैव स्वस्तिवाचनकं विना॥ पितॄनुद्दिश्य कर्तव्यं प्राचीनावीतिना सदा॥ तथा॥ स्वागते स्वस्तिवा
चने गोत्राशीष्यु प्रदक्षिणे॥ अर्घ्ये च दक्षिणादाने सव्यं षट्सु विधीयते॥ संग्रहे॥ आरोपे विप्रांघ्रिशौचांते भ्यर्चने
विकिरे हुते॥ पिंडान्न्युप्यार्चयित्वार्चैस्त्यज्य ब्राह्मणांस्तथा॥ आचमे श्राद्धकर्त्ता वै स्थानेष्वेतेषु सव्यतु॥ आ
द्यंतयोर्द्विराचामेच्छेषेषु तु सकृत्सकृत्॥ तथा॥ देवार्चा दक्षिणांगादि पादजान्वंसमंडलं॥ शिरोंसजानुपादेषु
वामांगादि च पैतृकी॥ कर्तव्येति शेषः॥ स्मृत्यंतरे॥ श्राद्धारंभे तु यद्दर्भाः पादशौचे च वियर्जयेत्॥ अर्चनादौ तु
यद्दर्भा उच्छिष्टांते विवर्जयेत्॥ पार्वणादौ तु यद्दर्भा घ्राणांते तु विसर्जयेत्॥ मार्जनादौ तु ये दर्भाः पिंडस्थाने वि
वर्जयेत्॥ उत्तानांते तु ये दर्भा दक्षिणांते विसर्जयेत्॥ प्रार्थनादौ तु ये दर्भा नमस्कारं विसर्जयेदिति॥ श्राद्धे षट्
पत्निकाल्हः॥ तथा॥ वसुरुद्रस्त्वाद्याः पित्रादित्रितये क्रमात्॥ मातामहादिमात्रादि -- च स्मृतिर्महती॥

चतुर्थी च

पे

भ

तथा॥ पिंडदाने तु वरुण प्रमाण[illegible]था॥ प्रद्युम्नो वासुदेवश्च [illegible]र्णस्तथैव हि॥ अथवा दक्षिणं जानु पातयेद्दक्ष
प्रदक्षिणं॥ यज्ञोपवीतिना स्याद्दैवं कुर्यात्सवे त्तथा॥ प्राचीनावीतिना पित्र्यं सव्यजानुनिपातितः॥ [illegible]क्षिणं स्कंधेन कर्तव्यं
म प्रदक्षिणत स्तिलैः॥ पितृभ्यो निखिलं देयं स्वधाकारेण सर्वदेति॥ नाप्रोक्षितं स्पृशेत्किंचिन्नैव दद्यान्मानुषीं गिरं॥ न
चोत्क्षेपेत भुंजानं नच्चैवाभाषिता पातयेत्॥ स्मयं क्रोधं प्रमादं च न श्राद्धेष्वाचरेल्लोभमेवेत्॥ दिवोदासीये॥ यदि वाग्यमलोपः
स्याज्जपहोमार्चनादिषु॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं॥ तथा॥ द्वे पवित्रे ऋजुनी दैवे कर्मणि योजयेत्॥
विभज्य द्विगुणीकृत्य त्रीणि त्रीणि [illegible]नि पैतृके॥ श्राद्धकाण्डे [illegible]ं चयत[illegible]॥ द्वे द्वे लौकिके देवानां तिस्रस्तिस्रस्तु पार्वणे॥
एकोद्दिष्टे च लौकिके श्राद्धेष्वर्घ्येषु [illegible]तोत्सू॥ तथा॥ ह[illegible]लौकिके श्र[illegible]यन आवाहनविसर्जने॥ दक्षिणां सोमन
स्यं च विनान्यद्देयपूर्वकं॥ श्राद्धविघ्नप्रणा[illegible]र्थे रक्षते हेमाद्रौ विष्णुधर्मोत्तरे॥ श्राद्धानि[illegible]होमं [illegible]यनारासं
हं हरिं परं॥ त्रिर्वं दैवं यथान्यायं त[illegible]ः श्राद्धं समाप्ते हरि[illegible] मार्चन चैनं च द्विक[illegible]ं ता[illegible]विजो[illegible]मे[illegible]
दृष्ट्यं दैवतांतरं॥ पितृभ्यश्चापि तद्देयमनंतं स्यात्[illegible]श्यो॥ पितृ[illegible]नु यो दद्यात्[illegible]येय[illegible]के[illegible]रो[illegible]दिह
[illegible]स्य भवंति क्षेत्रभागिनः॥ हरिस्कोद[illegible]ति॥ दिता[illegible]ः सर्वमनुष्याश्च विष्णुनाश्रितमर्चंति विष्णु[illegible]ता दिशंताश्च
[illegible]क्तिनिच्च॥ यः श्राद्धकाले हरिभुक्तशेषं [illegible]ददाति [illegible]पितृदेवताभ्यः॥ तेनैव पिंडं तुलसीविमिश्रमा नाके
[illegible]र्वं पितरस्तृप्ता सादहनि श्राहोलि[illegible]पचुदाना श्रयन रे तच्चैतन्निवेद्यं तत्तु कार्यं परिकल्पितं
प्रा[illegible]न्नमेव॥ प्रतिग्रहेण[illegible]दिग्यं दाना[illegible]अम[illegible]न्न[illegible]हि मी न कुर्यात् रोगा स्यात्[illegible]मीमत्स्यमाद्यु[illegible]दिति॥

इतिहासेपि ॥ इति श्राद्धपरिभाषा ॥ अथ क्षणदानादि ॥ हेमाद्रौ संग्रहे ॥ तिथिवारादिकं ज्ञात्वा संकल्पं च यथाविधि ॥
श्राद्धमारभेत्तेषां ज्ञो ह्यन्यथा निष्फलं भवेत् ॥ गारुडे ॥ श्राद्धार्थसमनुप्राप्तान्विप्रान् भूयो निमंत्रयेदिति ॥ तद्विधि
माह ॥ शौनकः ॥ गृहीत्वामुकसंज्ञस्यामुकगोत्रस्य चामुके ॥ श्राद्धे तु वैश्वेदेवार्थं करणीयः क्षणस्त्वया ॥ गृहीत्वाप
दमिसनुवर्त्तते ॥ इत्येवं श्राद्धकृद्ब्रूयादोंतथेति वदंस्तु सः ॥ श्राद्धस्य कर्त्तासंप्रयातं प्राप्नोतु भवानिति ॥ सर्वदे श्राद्ध
वानीति इतरस्तु प्रतिद्विजं ॥ पित्र्यादेरप्यनेनैव ग्रहणं तु विधिना द्विजानिति ॥ अथ विश्वेदेवाः ॥ प्रयोगपारिजाते
इष्टिश्राद्धे क्रतुदक्षौ संकीर्त्यौ वैश्वदेविकौ ॥ नांदीमुखे सत्यवसू काम्ये च धुरिलोचनौ ॥ पुरूरवार्द्रवौ चेत्ति पार्वणे
समुदाहृतौ ॥ नैमित्तिके कालकामौ एवं सर्वत्र कीर्त्तयेदिति ॥ ततः कर्त्ता च कृत्वोऽनाहिताग्निः पिंडपितृयज्ञं परि
स्तरणादीध्माधानांतं कुर्यात् ॥ अर्घ्यपात्राण्यप्येवमिति पारिजात आश्वलायनपरिशिष्टेभिहितं ॥ अथ पादप्र
क्षालनविधिः ॥ हेमाद्रौ शंखः ॥ संमार्जितोपलिप्तं तु द्वारि कुर्वीत मंडलं ॥ द्वारि द्वारसमीपे ॥ प्रांगणे मंडलं कुर्या
द्दैवे पित्र्ये च कर्मणि ॥ उत्तरे दक्षिणे चापि पश्चिमेन गृहांतरं ॥ उदक्प्लवमुदीच्यं स्याद्दक्षिणं दक्षिणाप्लवं ॥ तत्प्र
माणमुक्तं संग्रहे ॥ प्रादेशमात्रं देवानां मंडलं चतुरस्रकं ॥ वितस्तिमात्रं पित्र्ये तु मंडलं वर्त्तुलं भवेत् ॥ य
ज्ञोपवीति देवार्थं पित्र्यर्थं चापसव्यवत् ॥ अंतरं तु प्रकुर्वीत तयोर्मध्ये षडंगुलमिति ॥ तत्रैव वर्णपरत्वेन

विशेषमाह बौधायनः ॥ चतुरस्रं त्रिकोणं च वर्त्तुलं चार्द्धचंद्रकं ॥ कर्त्तव्यमानपूर्व्येण ब्राह्मणादिषु मंडलमिति ॥ स्मृत्यं-
तरे गर्त्तउक्तः ॥ गर्त्तः पंचांगुलो विप्रे जानुमात्रो महीभुजि ॥ आदन्नमात्रो वैश्यस्य साधिकः स तु भद्रके ॥ तिर्यगूर्ध्व-
प्रमाणेन व्याख्यातो दैवपित्र्ययोः ॥ चतुरस्रं वर्त्तुलं च कथितं गर्त्तलक्षणं ॥ पादप्रक्षालनं प्रोक्तमुपवेश्यासने
द्विजान् ॥ तिष्ठंश्च क्षालनं कुर्यान्निराशाः पितरो गता इति ॥ इतिमंडलाग्रे पृथक्कार्यमिति ॥ माधवः ॥ भृगुः ॥ आ-
सनं न जीर्णदेहायाने आयाम्या विशेषतः ॥ आर्त्तीयानवसक्ताया नगोगोमयमाहरेत् ॥ व्याघ्रः ॥ उत्तरे अक्षतसंयु-
तान्दर्भाग्रान्विन्यसेत्कुशान् ॥ दक्षिणे दक्षिणाग्रांस्तु तान्विन्यसेत्कुशान् ॥ मात्स्येपि ॥ अक्षताभिः सपुष्पाभि-
स्तदभ्यर्च्यापसव्यवत् ॥ विप्राणां क्षालयेत्पादानभिवंद्य पुनः पुनः ॥ प्रसंमुखः स्थितः कुर्याद्विप्रपादाभिषेच-
नं ॥ पारिजाते वसिष्ठः ॥ दिवा वा यदि वा रात्रौ न कुर्यात्प्राङ्मुखः शुचिः ॥ प्रसङ्मुखस्तु कुर्वीत विप्रपादाभिषेचनं ॥
भविष्ये ॥ प्रक्षालयेद्विप्रपादान् शंनोदेवीरिति स्मृत्या ॥ नकु[illegible]पि र स्तस्तु पादं दद्याद्विचक्षणः ॥ संग्रहे ॥
ततः प्रक्षालयेत्पादौ भार्या स्वाचितवारिणा ॥ यक्षाति[illegible]व्येण दक्षिणं सव्येन चावनेजनः ॥ तथा ॥ श्राद्धकाले
यदा पत्नी वामेन नीरं प्रदापयेत् ॥ आसुरं तद्भवेच्छ्राद्धं पितृणां नोपतिष्ठते ॥ नाचम्य प्रक्षालयेत्पादौ कन्यापित्रादिके
र्मसु भ इति ॥ अथ क्षालन निषेधांतरं [illegible] नंगमयगुनि ॥ दाद्यानंतरं पाद्यमपि दद्यादिति हेमाद्रिः ॥ धः
श्रौणाद्विजः ॥ मंडलादुत्तरे देशे द[illegible]मनी[illegible]कः क्षालनानंतरं पादौ द्विराचमनमिष्यते ॥ स्वयं चापि द्विराचामे-

द्विजितः श्रद्धयान्वितः॥ नारदीये॥ यथाचमनकारीणी पादप्रक्षालनोदकैः॥ संगवं तेषु चान्नाद्धि मासुरं न स्पृशेत्॥ कु
शाचमनं सर्वं विप्राणां तद्वंतरमिति॥ आसनानि॥ हेमाद्रौ व्यासः॥ क्षौमं दूकूलं नेपालं माविकं दारुजं तथा॥ ता
र्णपार्णं शस्तं चैव विष्टरादि चविन्यसेत्॥ दारुषु विशेषमाह पुलस्त्यः॥ श्रीपर्णी वारुणी सारी जंबुकाम्रकदंबकं॥
सप्तमं वा कुलं पीठं पितॄणां दत्तमक्षयं॥ संग्रहे॥ शमीवकाम्मरा शेलुः कदंबो वारणास्तथा॥ पंचासनानि शस्तानि
ज श्राद्धे वा भोने नधेनि॥ वर्ज्यानि तु॥ पलाशश्रावटप्लक्षोश्वमाश्वत्थं शाकवृक्षजं॥ मत्तिकोदुंबरपीठं माधुकं च विवर्जयेत्॥
वायुपुराणेपि॥ श्लेष्मांतको नक्तमालः कपित्थः शाल्मलिस्तथा॥ निंबो बिभीतकश्चैव श्राद्धकर्मणि न हिता॥ इति॥ व्या
सः॥ सव्येनैवासने दद्याद्दक्षिणे दक्षिणं करं॥ व्याहृतिभिः समस्ताभिः रासने ह्युपवेशयेत्॥ समाध्वमिति चैवोक्त्वा
दक्षिणं जानु संस्पृशेत्॥ आस्यतामिति तान्ब्रूयात् आसनं संस्पृशन्नपि॥ शातातपः॥ द्वौ दैवे प्राक् त्रयः पित्र्ये उद
गेकैकमेव वा॥ प्रागग्रेष्वथ दर्भेषु दक्षिणाग्रेषु चैव ततः॥ यत्तु हेमाद्रौ हारीतः॥ दक्षिणाग्रदर्भेषु प्राङ्मुखान्ब्राह्म
णान्भोजयेदुदङ्मुखान्निसेके इति —— मैत्रायणीयविषयं॥ प्राङ्मुखान्भोजयेदुदङ्मुखान्निसेक इति तत्सरि
त्रिखण्डात्॥ विकल्प इत्येके॥ नागरखंडे॥ अयःशंकुमयं पीठं अदेयं नोपवेशने॥ पितॄणां रजतं देयं देवानां स्वर्ण
निर्मितं॥ छागलेयः उपवेशनसंस्पर्शमाह॥ दक्षिणमुपक्रम्य उदकसंस्पर्शस्तु दैविके॥ पश्चाद्भागादुपक्रम्य प्राच्यां
